## श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तृतीया परीक्षा - प्रथमपत्रिका

**दिनाङ्कः** – 03-09-2023 **अङ्काः** – १००

**पूर्वाह्णः** – १०:०० तः १:०० पर्यन्तम् **समयः** – होरात्रयम्

ಸೂಚನೆಗಳು: ೧. ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯುವ ಉತ್ತರಗಳು ದೇವನಾಗರೀಲಿಪಿಯಲ್ಲೇ ಇರಬೇಕು.

೨. ಪ್ರಶ್ನೆಗಳ ಕ್ರಮಾಂಕಗಳನ್ನು ತಪ್ಪದೇ ಬರೆಯಿರಿ.

Instructions: 1. Write the Samskrita answers in Devanaagari script only.

2. Write the question numbers correctly.

1. **पञ्चानां संस्कृते एकवाक्येन उत्तरं लिखत ।** 5

    1. कीदृशाय शम्भवे नमः ?
    2. भोजेन का दत्ता ?
    3. शुकदम्पती कुत्र न्यवसताम् ?
    4. एकलव्यः किमर्थं द्रोणस्य समीपमगच्छत् ?
    5. कौशिकः कीदृशः द्विजः आसीत् ?
    6. कीदृशः पुरुषः न किञ्चित् कर्तुमर्हति ?

2. **षण्णां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 12

    1. कालटिग्रामः कुत्र अस्ति ? श्रीशङ्कराचार्यः कदा अवातरत् ?
    2. ब्राह्मणः स्वजनेभ्यः सुतविनाशकारणं श्रुत्वा किममन्यत ?
    3. के के त्याज्याः ?
    4. राक्षसाः के ?
    5. हनुमान् समुद्रस्योपरि किं किं चकार ?
    6. अमरशक्तेः पुत्रा के ? कीदृशास्ते ?
    7. पितामहः आत्मानं कथं दर्शितवान् ?

3. **त्रयाणां पञ्चषैः वाक्यैः संस्कृतेन उत्तरं लिखत ।** 9

    1. विष्णोराकारः कीदृशः ?
    2. गृहिणी द्विजं किमवदत् ?
    3. सीता कुत्र अवर्तत ? हनूमान् सीतां कथम् आश्वासयामास ?
    4. चित्रगीवः कः ? सः स्वाश्रितान् कथं ररक्ष ?

4. **चतुर्णां मातृभाषया दशभिः वाक्यैः उत्तरं लिखत ।** 12

1. एकलव्यस्य गुरुभक्तिं वर्णयत।
2. 'आहारशुद्धौ सत्वशुद्धिः' अस्य पाठस्य सारांशं लिखत।
3. कालिदासस्य कविताचातुर्यं लिखत।
4. श्रीशङ्करभगवत्पादैः कुत्र कुत्र किमर्थं च मठाः स्थापिताः ? तेषां मठानां प्रथमाचार्याः के ?
5. 'पञ्चतन्त्रमथामुखम्' – अस्य पाठस्य सारांशं लिखत।

5. **चतुर्णां ससन्दर्भं मातृभाषया विवृणुत ।** 12

1. "शयीमहि महीपृष्ठे" ।
2. "गलं भित्त्वा अश्नाम" ।
3. "सर्पेण युक्तमेव कृतम्" ।
4. "कथमिमे गिरिमुद्धर्तुं शक्नुयुः?"
5. "वशमेष्यन्ति मे तदा" ।

6. **द्वयोः अन्वयानुसारम् अर्थं मातृभाषया लिखत ।** 4

१. नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने ।
गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ॥

२.अपश्यंस्तत्र वैदेहीं विचिन्वानस्ततस्ततः ।
अशोकवनिकां गत्वा सीतां खिन्नां ददर्श सः ॥

३. सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत्सुखम् ।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् ॥

7. **श्लोकद्वयं पूरयत ।** 4

1. प्रथमवयसि ---------------------- विस्मरन्ति ॥
2. राजा घृणी -------------कृतं न वेत्ति ॥
3 . दोर्भिर्युक्ता -------------- सर्वदा सुप्रसन्ना ॥

8. **अस्य गद्यभागस्य अनुवादं कुरुत।** 3

विष्णुशर्मणापि तेषां कृते मित्रभेद- मित्रप्राप्ति-काकोलूकीय-लब्धप्रणाश-अपरीक्षितकारकाणि चेति पञ्च तन्त्राणि रचयित्वा पाठितास्ते राजपुत्राः। तेऽपि तान्यधीत्य मासषट्केन नीतिशास्त्रकोविदाः संवृत्ताः। तदिदं शास्त्रं पञ्चतन्त्रमिति लोके प्रसिद्धम्।

9. **रिक्तस्थानानि पूरयत।** 3

1. शिरसि निहितभारा ________ ।
2. -------- गोप्यानि कारयेत् ।
3. न गर्जन्ति --------------- ।

10. **त्रयाणां पर्यायपदानि लिखत।** 3

1. द्विजः 2. भर्ता 3. भुजङ्गमः 4. अन्तिकम्

11. **त्रयाणां विरुद्धपदानि लिखत।** 3

1. सृष्टिः 2. सूक्ष्मः 3. प्रकाशः 4. सुरः

12. **त्रीणि पदानि संस्कृतवाक्येषु योजयत।** 3

1. साधयामि 2. श्रुतः 3. शाश्वतः 4. प्राक्

13. **त्रयाणां सन्धिं विभज्य सन्धिनाम लिखत।** 3

1. जगद्गुरुः 2. केयम् 3. हस्तेनैकेन 4. सर्वेऽपि

14. **वाक्यदोषं परिहरत। (त्रयाणाम् एव)** 3

1. बालकः पितरं सह गच्छति। 2. अहं कथां पठति।
3. शिशुः क्षीरं स्पृहयति। 4. गणेशं नमः।

15. **सुबन्त-तिङन्त-अव्ययानि पृथक् कृत्वा लिखत।** (द्वावेव) 3

1. नीतिविदा स्वस्यायुर्न कथनीयम् ।
2. राजा विक्रमः भवन्तमाह्वयति ।
3. हनूमान् सीतामाश्वासयामास ।

16. **लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत। (द्वयोः)** 4

1. चक्रारपङ्क्तिरिव-------------- । 3. उद्योगिनं --------------।
2. क्लेशः फलेन --------------- ।

**17. संयोज्य लिखत ।** **4**

| **अ** | **आ** |
| --- | --- |
| अनुपदम् | ल्यबन्ताव्ययम् |
| अवातरत् | कारयामास |
| गवेषमाणः | अव्ययम् |
| अधीत्य | तिङन्तम् |
| | वर्तमानकृदन्तः |

**18. व्याकरणविशेषं लिखत ।** **2**

1. पठति स्म 2. कपोतराजः

**19. रेखाङ्कितपदमधिकृत्य प्रश्नवाक्यं कुरुत।** **2**

1. अमरशक्तेः <u>त्रयः</u> पुत्राः आसन् । 2. एकलव्यः <u>द्रोणस्य</u> प्रतिमाम् आर्चत् ।

**20. समूहेतरपदं पृथक् कृत्वा लिखत।** **2**

1. पठिष्यति, गमिष्यति, अवदत्, करिष्यति ।

2. भूपालः, महीपालः, नरपतिः, गवांपतिः ।

**21. चतुर्थपदं लिखत।** **2**

1. हरिश्च - श्चुत्वसन्धिः :: अजन्तः – -----------

2. पठ् – पठित्वा :: गम् - -----------

**22. प्रयोगपरिवर्तनं कुरुत।** (एकस्य एव) **2**

1. श्रूयतां ममैष सिंहनादः । 2. तेन पूजा न कृता ।

SSSSSSSSSSSSSSSSSS